X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 61

Title SAPTA'SATI MANTRA
AND NAVARNAVA MANTRA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 61. Subject: Tantric ritual.

Title: Saptaśati Mantra and Navārṇa Mantra,

Author: Govinda. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: Kasi. Place of the Ms.: —

Size: 1·2"×4·20 Extent: 12 foll.

Language: Sanskrit. Script: Devanagari.

Remarks: Complete.

॥श्रीगणेशाय नमः॥ ॥कात्यायनीतंत्रो
सप्तशती क्तंमंत्रभागा लिख्यंते॥ ॥अनिर्वाच्यज
गत्कमलयस्थानन्नमाम्ययं।सत्याद्रूप
हितात्मानं नमाम्ययेतमुपाश्रयं॥१॥विघ्न
निर्विघ्नकर्त्तारं दुरितघ्नस्मृतिस्तवं।वंदे वि
घ्नहरं देवं प्रसन्नं करुणार्णवं॥२॥चतुर्दश
जनांतस्याया चतुर्दशरूपिणी।चतुर्दशोवि ॥१॥
तामायाद्वाकू चतुर्दशभाकृष्ठभा॥३॥का

शांतिवाप्तिश्रीकाण्वोगणेशार्यः सुतः सुधीः
।गोविंदस्तनुते सप्तशतीमंत्रविभाजनं॥४॥
अष्टसप्तत्युत्तराणां श्लोकानां शतपंचकं।
प्रोक्तं सप्तशतीस्तोत्रं तत्सप्तशतीसंख्यया॥
५॥विभज्य ज्युकुयान्मंत्रैरेभिः कात्यायनी
मते।मार्कंडेय उवाचेकं सावर्ण्यादिस्ततः
परं॥६॥श्लोकमंत्राः सप्तदशार्द्धश्लोकात्मक
स्ततः।एकोनविंशदेवं स्युर्वैश्योक्तिविंशति

ष्टुपा॥७॥पुनरर्द्धःपुनःश्लोकत्रयमर्द्धःपु
नर्न्नवित्।पंचविंशतिरेवंस्याद्राज्ञामर्द्धश
कस्ततः॥८॥अर्द्धश्लोकात्मकंमंत्रंद्वयंवैश्यः
पुनःभवेत्।एकोनत्रिंशदेवंस्युर्मंत्रसंख्या
प्रकीर्त्तिता॥९॥पुनरर्द्धंपुनःश्लोकत्रयमर्द्धं
पुनर्न्नवेत्।मार्कंडेयःपुनश्चार्द्धःश्लोकःश्लो
कात्मकःपुनः॥१०॥अर्द्धश्लोकात्मकोमं
त्रोराज्ञार्द्धश्लोकमंत्रकः।मंत्राश्चत्वारिंशदेवं ॥२॥

द्विश्लोकमंत्रचतुष्टयं॥११॥पुनरर्द्धैस्त्रि
श्चार्द्धश्लोकमंत्राःपुनर्दश।पुनरर्द्धःपुना
राजेत्येकोनाषष्टिरुच्यते॥१२॥पुनरर्द्धंपु
नःश्लोकःपुनरर्द्धंपुनस्त्रिभिः।पुनरर्द्धंपुनः
श्लोकाःषण्मंत्रापुनरर्द्धकौ॥१३॥निद्रांभ
गवतींविष्णोरतुलांतेजसःप्रभुः।इत्येव
पाठेमंत्राणांमेकसप्ततिरुच्यते॥१४॥ब्र
ह्मार्द्धश्लोकमंत्रोपश्लोकमंत्रास्त्रयोदश।

अर्द्धश्लोकोऋषिश्चार्द्धःश्लोकःश्लोकास्तु
पंचवै॥१५॥पुनरर्द्धंतुमंत्राणांसपंचनव
तिःस्मृताः।भगवानर्द्धमंत्रेद्वेऋषिश्लोका
र्द्धकंपुनः॥१६॥श्लोकःपुनऋषिश्लोकेंद्व
यंमंत्रद्वयंभवेत्।श्लोकानामष्टसप्तत्याश्च
तुर्भिरधिकंशतं॥१७॥उवाचवचनैःसार्द्ध
विभागःप्रथमेमतः।मार्कंडेयचयंवैश्य ॥३॥
द्वयंराज्ञात्रयंमतः॥१८॥ऋषिपंचकमुद्दि

ष्टंभगवानेकएवतु।ब्रह्मैक्यंतुचतुर्विंश
दर्द्धमंत्राःप्रकीर्त्तिताः॥१९॥उवाचपदम
ध्येषुश्लोकद्वादशकेषुच।अध्यायाद्यावे
कऋषिरुवाचेतिसकृन्मनुः॥२०॥अष्ट
षष्टिमिताःश्लोकास्तावंतो नवोमताः
।एकोनसप्ततिःसर्वैध्यायेमंत्राद्वितीय
के॥२१॥आद्यावृषिरुवाचैकःपंचत्रिंश
त्ततःपरं।निहन्यमानाद्याःश्लोकास्त्वरा

गाकुलांकुरं ॥२२॥ इत्यंतादेव्युवाचैकोगर्ज
गर्जेति चापरः। श्लोकोऋषिरुवाचेति नि
पुनश्च श्लोकपंचकं ॥२३॥ चतुश्चत्वारिंशत
स्तु सर्वे मंत्रास्तृतीयके। आद्योऋषिरुवाचे
तिशकाद्याः श्लोकमंत्रकाः ॥२४॥ षड्विंश
स्तु ऋषिश्लोको ह्ययं देवीततः परं। व्रियतां
त्रिदशाः सर्वे यदस्मत्तो भिवांछितं ॥२५॥ इ ॥४॥
त्यर्द्धश्लोकमंत्रोथ देवाऊचुस्ततः परं। न्त

वत्याकृतं सर्वमित्यर्द्धश्लोकमंत्रकः ॥२६
॥ यदयं निहतार्द्धं च श्लोकमंत्रत्रयं भवेत्
। ऋषिश्लोकास्तु चत्वारो मनवः परिकी र्
र्तिताः ॥२७॥ ऋषित्रयं तु देव्येक एकदेवा
स्तु पंचभिः। उवाच वध्यनैः श्लोकाः पंचत्रिं
शत्तु मंत्रकाः ॥२८॥ अर्द्धश्लोकात्मकं मंत्रद्व
यमेवं भवेदिह। षड्विंशश्लोककेध्यायेच
त्वारिंशद्व्याधिकाः ॥२९॥ विनियोगए

नाकार्यमंत्राणांद्रवनादिषु।मद्दसप्ततिः
श्लोकयुक्तेऽध्यायेमंत्रास्तुपंचमे॥३०॥श्लो
कमंत्रास्ततोदेवाऊचुश्चैवाष्टमोमनुः।न
मोदेव्यादिकाःश्लोकाःपंचमंत्राःप्रकीर्ति
ताः॥३१॥एकोनत्रिंशदधिकंशतंकात्या
यनीमतो।एकोरुषिरुवाचेतिपुरार्धंनाद
यश्चषट्॥३२॥त्रयोदशैवमंत्रास्तुयादेवी
त्यादयोपिच।एकविंशतिकाःश्लोकाना ॥५॥

र्यंतास्तेषुमंत्रकाः॥३३॥प्रतिश्लोकंत्रयो
ज्ञेयामंत्रास्तेचत्रिषष्टिकाः।पुनःश्लोका
त्मकोमंत्रस्त्रियंत्रःश्लोककःपुनः॥३४॥
त्रयोविंशश्लोककेषुमंत्रावैसप्तषष्टिकाः
।यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता
३५॥नमस्तस्यैइतिप्रोक्तोविंशत्यक्षरको
मनुः।नमस्तस्यैइतिप्रोक्तोद्वितीयश्चत्र्य
क्षरः॥३६॥अष्टाक्षरस्तृतीयोपिनमस्त

स्येनमोनमः।एवंद्वाविंशतिश्लोकेज्ञेयंमंत्र
त्रयंबुधैः॥३७॥एवैश्चतुर्दशैर्मंत्रैःसद्वाशी
तिरुद्राहृताः।स्तुतासुरैरितिश्लोकाद्वयंचै
वपुनर्ऋषिः॥३८॥पुनःसप्तदशश्लोकास्त
बिश्लोकत्रयंततः।ततश्चैवनवश्लोकास्त
बिरेकोंविकाततः॥३९॥चतुःश्लोकीपु
नर्ऋतिश्चतुःश्लोकःपुनःशिवाश्लोकद्वयं
मिलिताश्चत्वारिंशद्वयाधिका॥४०॥श्लो ॥६॥

काःसप्तोवाचवाक्यमेकोनार्द्धशतैःसह।
अशीत्याश्चापिसंयोगेएकोनत्रिंशताधि
कं॥४१॥शतमेवंतुविज्ञेयमाकृतीनांच
पंचमे।कृषिश्चतुष्टयप्रोक्तंदेवाऊचुः
सकृत्पुनः॥४२॥दूतोवाचद्वयंदेवीउवा
चद्वितीयंतथा।नवोवाचचतुःपंचाश
श्लोकाकृतयस्तथा॥४३॥द्वाविंशत्याकृ
तिश्लोकेषट्षष्ट्याकृतयोमताः।एकोन

त्रिंशदधिकमाकृतीनांशतंमतं॥४४॥विंश
तिश्लोकसंयुक्ते षष्ठेध्यायेप्रकीर्त्तिताः।
सर्वेश्लोकामंत्ररूपादेव्येकाप्यृषिस्त्वयं
॥४५॥चतुर्विंशतिमंत्राणामित्येवंपरि
कीर्त्तिताः।पंचविंशच्छ्लोकयुक्तेध्यायेमं
त्रास्तुसप्तमे॥४६॥सर्वेमंत्राश्लोकरूपा
ऋष्युवाचद्वयंततः।सप्तविंशतिरेवंतु
मंत्रसंख्याप्रकीर्त्तिता॥४७॥सार्द्धैकषष्टि ॥७॥

श्लोकाढ्येष्टमेध्यायेप्रकीर्त्तिताः।एकषष्टि
श्लोकमंत्राश्चांतेर्द्धश्लोकमंत्रकः॥४८॥
आद्यावेकोऋषिश्चैकत्रिषष्टिर्मंत्रसंततिः
।एकोनचत्वारिंशद्भिःश्लोकैर्युक्तेप्रकी
र्त्तिताः॥४९॥अध्यायेनवमेमंत्रास्तावं
तोथमनुद्वयं।राज्ञाऋषिश्चेनिचैकचत्वा
रिंशन्मनुस्त्वयं॥५०॥सार्द्धसप्तत्वितैर्विं
शत्श्लोकैस्तुदशमेन्विते।सप्तविंशति

मंत्राख्यश्लोकरूपास्तनोंतिमः॥५१॥अर्द्ध
श्लोकात्मकोमंत्रोऋष्युवाचद्वयंतथा।देव्यु
वाचद्वयंचैवद्वात्रिंशन्मंत्रसंग्रहः॥५२॥
श्लोकानांसार्द्धपंचाशज्ज्ञेयमेकादशेस्फुटं।
पंचाशच्छ्लोकमंत्रास्तेर्द्धंतेर्द्धश्लोकमंत्रकः
॥५३॥देवीद्वयंऋषिश्चैकोदेवाएकइती
रितः।पंचपंचाशदाकृत्याकार्यंमंत्रविभा
जनं॥५४॥श्लोकेदेवाऊचुरेकमेवंज्ञेयंतु ॥८॥

साधकैः।अष्टत्रिंशच्छ्लोकयुक्तेप्यध्यायेद्वा
दशात्मके॥५५॥एकचत्वारिंशदस्तुमंत्रा
स्तत्राकृतिद्वयं।अर्द्धश्लोकात्मकःश्लोकाः
सप्तत्रिंशन्मितात्रऋषिः॥५६॥देव्युवाचेति
चैवैकमेवंसंख्यास्फुटोदिता।त्रयोदशेः
सार्द्धसप्तदशश्लोकाःप्रकीर्त्तिताः॥५७॥
एकादशार्द्धकृतयोद्वादशश्लोकमंत्रकाः।
उवाचवचनैःषड्भिर्मंत्राएकोनत्रिंशतिः॥

५८॥ मार्कंडेयत्रयं देवीहृदयमेक ऋषिर्नवेत्
एवं कात्यायनीतंत्ररीत्या प्रोक्तं विभाजनं॥
५९॥ श्रीगोविंदशर्मणा भट्टगणेशार्यसुते
नद्धि। का एव काशीनिवासेन प्रोक्तं सप्तश
तीस्कृतौ॥ ६०॥ तेनाप्रीणातु भगवान्मम कृ
नाकृतिरीश्वरः॥ इति सप्तशतीमंत्रभागः
समाप्तः॥ विष्णोर्माया चेतना बुद्धिनिद्रा क्षु
धा छाया चापि शक्तिस्तृष्णा। क्षांतिर्जाति ॥६॥

श्चैव लज्जा च शांति श्रद्धा कांतिकीर्त्यति
चापि लक्ष्मीः॥१॥ वृत्तिस्मृतिर्दया तुष्टि
मातृर्भ्रांतिरिति क्रमात्। एकविंशतिरू
पाणि यस्यास्तस्यै नमो नमः॥२॥ इति का
त्यायनीतंत्रोक्तसप्तशतीमंत्रविभागः स
माप्तः॥ ॥ अस्य श्रीदेवीकवचस्य। ब्रह्मा
ऋषिः। नवदुर्गा देवता। अनुष्टुप्छंदः। म
हालक्ष्मीप्रीत्यर्थे जपे विनियोगः॥ नारदॐ

॥ नवार्णवमंत्रो लिख्यते ॥ तत्रादौ मूलेनाचम्य
ख्यान्यङ्गि: संस्पृश्य । मूलेन शिखां बध्वा ।
मूलेन प्राणानायम्य ॥ गुरुगणपत्यादीन्न
मस्कृत्य ॥ अद्येत्यादि श्रीपरदेवताप्रीतये म
मानीष्टसिद्ध्यर्थं सावर्णिः सूर्यतनय इत्या
रभ्य सावर्णिर्भविता मनुरित्यंतं चरितत्र
यात्मकं नवार्णवरात्रीसूक्त देवीसूक्तसंपु ॥१०॥
टितं सप्तशतीस्तोत्रमहं पठिष्ये ॥ इति संक

ल्पः ॥ नवार्णवं जपेद्यथा ॥ ॐ ऐं ह्रीं क्लीं चामुं
डायै विच्चे ॥ इति मूलमंत्रः ॥ अस्य श्री न
वार्णवमंत्रस्य । ब्रह्मविष्णुमहेश्वरा ऋषयः
गायत्र्युष्णिगनुष्टुप्छंदांसि । महाकाली०
त्यो देवताः । रक्तदंतिकादुर्गाभ्रामर्यो बी
जानि । नंदाशाकंभरीभीमाः शक्तयः । अग्नि०
स्तत्वानि । ममाभीष्टसिद्धये श्रीपरदेवता
प्रीत्यर्थं सप्तशत्यंगत्वेन नवार्णवमंत्रजपे

वि०॥ब्रह्म० भ्योनमः शिरसि।गाय० दोर्भ्यां
नमः मुखे।महाकाली० भ्योनमः हृदि।रक्त
भ्यो बीजेभ्योनमः गुह्ये।नंदा० भ्यः शाक्ति
भ्योनमः पादयोः।अग्नि० भ्यस्तत्वेभ्योनमः।
।सर्वांगे।इतिऋष्यादि॥मूलषडंगन्यासः।
ॐ ऐं अंगुष्ठाभ्यां नमः।ॐ ह्रीं तर्जनीभ्यां स्वाहा।
ॐ क्लीं मध्यमाभ्यां वषट्।ॐ चामुंडायै अ० हुं। ॥२१॥
ॐ विच्चे कनि० वौषट्।ॐ ऐं ह्रीं० च्चे कर० भ्यां फट्।

ॐ अपहृदयादिन्यासः॥अथध्यानं॥खड्गं
चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषा
वृतां।नीलाश्मद्युतिमास्यपाददशकां
सेवे महाकालिकां यामस्तौत्स्वपिते हरौ क
मलजो हंतुं मधुं कैटभं॥१॥अक्षस्रक्
परशुं गदेषुकुलिशं पद्मं धनुः कुंडिकां
दंडं शक्तिमसिं च चर्मजलजं घंटां सुराभा
जनं।शूलं पाशसुदर्शने च दधतीं हस्तैः

प्रवालप्रभैसेवेसैरिभमर्द्दिनीमिहमहालक्ष्मीं
सरोजस्थितां॥२॥घंटांशूलहलानिशंखमु
शलेपद्मंधनुःसायकान्हस्ताब्जैर्दधतींघनां
तविलसच्छीतांशुतुल्यप्रभां।गौरीदेहसमु
द्भवांत्रिजगतामाधारभूतांमहापूर्वमित्रस
रस्वतीमनुभजेशुंभादिदैत्यार्द्दिनीं॥३॥इ
तिध्यात्वा।मा०।मूलमंत्रोत्तरशतंजपेत्।गुह्ये
तिसमर्प्य।गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्म ॥१२॥
त्कृतंजपं।सिद्धिर्भवतुमेदेवीत्वत्प्रसादान्महेश्वरि॥
ततोविश्वेश्वरींजगद्धात्रीं०इंतुमेतांसुरोइत्यंतरा
त्रीसूक्तंजपेत्॥ततःसप्तशतींपठेत्॥श्रीरस्तु॥